## द्वितीयः पाठः

# कारुणिको जीमूतवाहनः

*[प्रस्तुत पाठ* ***'नागानन्दम्'*** *नाटक से अवतरित किया गया है। इसके रचयिता हर्ष (हर्षवर्धन) माने जाते हैं। हर्षवर्धन थानेश्वर और कन्नौज के राजा प्रभाकरवर्धन के पुत्र और राज्यवर्धन के छोटे भाई थे। हर्षवर्धन का राज्यकाल 606 ई० से 648 ई० तक माना जाता है। यह नाटक मूल रूप में पाँच अंकों का है। इसमें जीमूतवाहन नामक परोपकारी विद्याधर राजकुमार के द्वारा आत्मोत्सर्ग करके शंखचूड़ नामक सर्प को गरुड़ से बचाने का वर्णन है। जीमूतवाहन के अनुपम त्याग को दर्शानेवाला यह नागानन्द नाटक बौद्धधर्म से प्रभावित है। इसमें अहिंसा, त्याग, आत्म-बलिदान, दया, परोपकार आदि मानवीय-मूल्यों का महत्त्व प्रभावोत्पादक ढंग से प्रतिपादित किया गया है।]*

**(ततः प्रविशति प्रतीहारः)**

**प्रतीहारः**—जलधिवेलावलोकनकुतूहली निष्क्रान्तः कुमारो जीमूतवाहनश्चिरयतीति दुःखमास्ते महाराजविश्वावसुः समादिष्टश्चास्मि तेन। यथा सुनन्द श्रुतं मया सन्निहितगरुड़प्रतिभयमुद्देशं गतो जमाता जीमूतवाहनो तत्र चिरयतीति शङ्कित एवास्म्यनेन वृत्तान्तेन। तत्त्वरितं विज्ञायागच्छ किमसौ स्वगृहमागतो न वेति। यावत्तत्र गच्छामि। (परिक्रामन्नग्रतोऽवलोक्य) अयमसौ राजर्षिर्जीमूतवाहनस्य पिता जीमूतकेतुरुटजाङ्गणे सहधर्मचारिण्या राजपुत्र्या वध्वा च पर्युपास्यमानस्तिष्ठति। तद्यावदुपसर्पामि।

**(ततः प्रविशत्यासनस्थः पत्नीवधूसमेतो जीमूतकेतुः)**

**प्रतीहारः** – (सहसोपसृत्य) जीमूतवाहनस्य ..........।

**जीमूतकेतुः** – (कर्णौ पिधाय) शान्तं पापम्।

**देवी** – प्रतिहतममङ्गलम्।

**नायिका** – अनेन दुर्निमित्तेन वेपत इव मे हृदयम्।

**जीमूतकेतुः** – भद्र! किं जीमूतवाहनस्य?

**प्रतीहारः** – जीमूतवाहनस्य वार्तामन्वेष्टुं प्रेषितोऽस्मि महाराजविश्वावसुना युष्मदन्तिकम्। तदाज्ञापयतु महाराजः किं मया स्वामिने विज्ञापनीयमिति।

**जीमूतकेतुः** – किमसन्निहितस्तत्रापि मे वत्सः?

**प्रतीहारः** – अथ किम्।

**देवी** – (सविषादम्) यदि तत्र न सन्निहितस्तत् क्व गतो मे पुत्रको भविष्यति येनैवं चिरयति।

**जीमूतकेतुः** – नियतमस्मत्प्राणयात्रार्थं नितान्तं दूरं गतो भविष्यति।

**नायिका** – (सविषादमात्मगतम्) अहं पुनरार्यपुत्रमप्रेक्ष्यमाणान्यदेव किमप्याशङ्के।

**प्रतीहारः** – आज्ञापयतु महाराजः। किं मया स्वामिने निवेदनीयम्?

**जीमूतकेतुः** – (वामाक्षिस्पन्दनं सूचयित्वा) जीमूतवाहनश्चिरयतीति मय्याकुले विचिन्त्यति। (सविस्मयम्) कथं चरणयोरेव पतितम्। (सर्वे निरूपयन्ति)

**जीमूतकेतुः** – अये कथं लग्नसरसमांसकेशश्चूडामणिः? कस्य पुनरयं भविष्यति?

**देवी** – (सविषादम्) महाराज! पुत्रकस्येव एतच्चूडारत्नम्।

**नायिका** – मैवं भण।

**प्रतीहारः** – महाराज! मैवमविज्ञाय विक्लवो भूः। अत्र हि तार्क्ष्येण भक्ष्यमाणानां नागाधिपानामनेकशो नखमुखोत्खाताः पतन्त्येते शिरोमणयः।

**देवी** – सुनन्द! यावदनया वेलया श्वशुरसदनमेव गतो मे पुत्रको भविष्यति। तद्गच्छ ज्ञात्वा लघ्वेवास्माकं निवेदय।

**प्रतीहारः** – यदाज्ञापयति देवी। (इति निष्क्रान्तः)

**जीमूतकेतुः** – देवि! अपि नाम नागचूडामणिरयं स्यात्।

**(ततः प्रविशति रक्तवस्त्रसंवीतः शङ्खचूडः)**

**शङ्खचूडः** – (सास्रम्) कष्टं भोः कष्टम्।
हा परमकारुणिक! हा निष्कारणैकबान्धव! हा परदुखःदुःखित! हा परोपकारतृणीकृतदत्तदेह! क्व न खलु गतोऽसि? हा शङ्खचूडहतक! किं कृतं त्वया।

**देवी** – (ससाध्वसम्) महाराज! एष कोऽपि रुदितवदन इत एव त्वरितमागच्छन्हृदयं आकुलीकरोति। तज्ज्ञायतां तावत्क एष इति।

**जीमूतकेतुः** – (आकर्ण्य सहर्षम्) देवि! मुञ्च विषादम्। अस्यायं चूडामणिर्नूनं मांसलोभात् केनापि पक्षिणाकस्मादुत्खायानीयमानोऽस्यां भूमौ पतितः।

**देवी** – (सहर्षमलयवतीमालिङ्ग्य) अविधवे! धीरा भव।

**जीमूतकेतुः** – (शङ्खचूडमुपसृत्य) वत्स! किं तव चूडामणिरपहृतः।

**शङ्खचूडः** – आर्य! न ममैव त्रिभुवनस्यापि।

**जीमूतकेतुः** – कथमिव।

**शङ्खचूडः** – श्रूयताम्। शङ्खचूडो नाम नागः खल्वहं वैनतेयस्याहारार्थमवसरप्राप्तो वासुकिना प्रेषितः। किं बहुना विस्तरेण।

**विद्याधरेण केनापि करुणाविष्टचेतसा।**
**मम संरक्षिताः प्राणा दत्वात्मानं गरुत्मते।।**

**जीमूतकेतुः** – कोऽन्य एवंपरहितव्यसनी। ननु स्फुटमेवोच्यतां जीमूतवाहनेनेति। हा हतोऽस्मि मन्दभाग्यः।

**देवी** – हा पुत्रक किं त्वया कृतम्?

**नायिका** – हा कथं सत्यीभूतं मे दुर्निमित्तम्?

**(सर्वे मोहं गच्छन्ति)**

**शङ्खचूडः** – (सास्रम्) अये! नूनमेतौ पितरौ तस्य महासत्त्वस्य। अप्रिय-निवेदनान्मयैवेमामवस्थां नीतौ। अहो प्राणप्रदस्य सुसदृशं प्रत्युपकृतं जीमूतवाहनस्य शङ्खचूडेन। तत्किमधुनैवात्मानं व्यापादयामि। अथवा समाश्वासयामि तावदेतौ। तात! समाश्वसिहि। समाश्वसित्वम्बा।

**(उभौ समाश्वसितः)**

**देवी** – हा पुत्र जीमूतवाहन! यस्मै ते गुरुजनशुश्रूषां वर्जयित्वान्यत् सुखं न रोचते स कथमिदानीं पितरमुज्झित्वा स्वर्गसुखमनुभवितुं गतोऽसि।

**जीमूतकेतुः** – (सास्रम्) देवि! किं जीमूतवाहनेव विना जीवामो वयं येनैवं विलपसि।

**नायिका** – (पादयोर्निपत्य कृताञ्जलिः) तात! देहि मे आर्यपुत्रस्य चूडारत्नं येनैतद् हृदये कृत्वा अपनयाम्यात्मनः सन्तापदुःखम्।

**जीमूतकेतुः** – किं मामाकुलयसि?

**शङ्खचूडः –** (आत्मगतम्) कष्टं ममैकस्य पापस्य कृते सकलमेवेदं विद्याधर-कुलमुच्छिन्नम्। तदेवं तावत्। (प्रकाशम्) कदाचिन्नायं नाग इति ज्ञात्वा जीवन्तमेव जीमूतवाहनं परित्यजेन्नागशत्रुः। तदनयैव रुधिरधारया वैनतेयमनुसरामः।

**जीमूतकेतुः –** वत्स! अवितथैषा तव भारती भवतु। वयमपि त्वरितमेवानुगच्छामः।

**(इति पत्नीवधूसमेतो निष्क्रान्तः)**

**शङ्खचूडः –** तद्यावद्गरुडमनुसरामि।

**(ततः प्रविशत्यासनस्थः पुरः पतितनायको गरुडः)**

**गरुडः –** (आत्मगतम्) जन्मनः प्रभृतिभुजङ्गपतीनश्नता नेदमीदृशमत्याश्चर्यं मया दृष्टपूर्वं यदयं महासत्त्वो न केवलं न व्यथते प्रत्युत प्रहृष्ट इव किमपि दृश्यते।
तत्कुतूहलमेव जनितमस्यानया धैर्यवृत्या। भवतु, न भक्षयाम्येवैनम् पृच्छामि तावत्कोऽयमिति। (अपसर्पति)
(आत्मगतम्) आश्चर्यमाश्चर्यम्। कथमयमस्यामप्यवस्थायामेव-मूर्जितमभिधत्ते। (प्रकाशम्) अहो महासत्त्व!

**आवर्जितं मया चञ्च्वा हृदयात्तव शोणितम्।**
**धैर्येणानेन च हृतं त्वया हृदयमेव मे।**
**अतः कस्त्वमिति श्रोतुमिच्छामि।**

**जीमूतवाहनः–** एवं क्षुधाकुलो भवान्न श्रवणयोग्यः। ततः कुरुष्व तावत्प्रथमं मम मांसशोणितेन तृप्तिम्।

**शङ्खचूडः –** (सहसोपसृत्य) तार्क्ष्य! न खलु साहसमनुष्ठेयम्। नायं नागः। परित्यजैनम्। मां भक्षय। अहं तवाहारार्थं प्रेषितोऽस्मि वासुकिना।

**गरुडः –** (उभौ निरूप्य) द्वयोरपि भवतोर्वध्यचिह्नम्। कः खलु नाग इति नावगच्छामि।

**शङ्खचूडः –** अस्थान एव ते भ्रान्तिः।

**गरुडः –** (शङ्खचूडम् पश्यन् नायकं च वीक्ष्यमाणः) कः खल्वयं मया व्यापदितः?

**शङ्खचूडः –** विद्याधरवंशतिलको जीमूतवाहनः। कथमकारुणिकेन त्वयेदमनुष्ठितम्।

**गरुडः –** अये! करुणार्द्रचेतसानेन महात्मना ममास्यगोचरपतितस्यास्य फणिनः प्राणान् परिरक्षितुं स्वदेहः आहारार्थमुपनीतः। तन्महदकृत्यमेतन्मया कृतम्। तदस्य महतः पापस्याग्निप्रवेशादृते नान्यत्प्रायश्चित्तं पश्यामि। (दिशोऽवलोक्य) अये! अमी केऽपि इत एवाभिवर्तन्ते? तद्यावदेतान् प्रतिपालयानि।

**शङ्खचूडः –** कुमार! पितरौ ते प्राप्तौ।

**जीमूतवाहनः–** (ससम्भ्रमम्) शङ्खचूड! समुपविश्यानेनोत्तरीयेण आच्छादितशरीरं कृत्वा धारय माम्। अन्यथा कदाचिदीदृगवस्थं मां सहसा अवलोक्य पितरौ जीवितं जह्याताम्।

**(शङ्खचूडः पार्श्वपतितमुत्तरीयं गृहीत्वा तथा करोति)**

**(ततः प्रविशति पत्नीवधूसमेतो जीमूतकेतुः)**

**जीमूतकेतुः –** (सास्रम्) हा पुत्र जीमूतवाहन!

**गरुडः –** (श्रुत्वा) हा पुत्र जीमूतवाहनेति ब्रवीति। व्यक्तमयमस्य पिता। न शक्नोमि पुत्रघाताल्लज्जया मुखं दर्शयितुम्। (जानुभ्यां स्थित्वा कृताञ्जलिः) भो महात्मन्कस्तर्हि कथ्यताम्।

**जीमूतवाहनः–** प्रतिपालय क्षणमेकम्। पितरौ मे प्राप्तौ यावदेतौ प्रणमामि।

**जीमूतकेतुः** – (दृष्ट्वा सहर्षम्) देवि दृष्ट्या वर्धसे। अयं वत्सो जीमूतवाहनो न केवलं ध्रियते प्रत्युत कृताञ्जलिना गरुडेन शिष्येणेव पर्युपास्यमानस्तिष्ठति।

**देवी** – महाराज कृतार्थाऽस्मि। अक्षतशरीरस्य पुत्रकस्य मुखं दृष्टम्।

**जीमूतकेतुः** – उपसृत्य, वत्स एह्येहि परिष्वजस्व माम्।

**(जीमूतवाहनः उत्थातुमिच्छन् पतितोत्तरीयो मूर्च्छति)**

**जीमूतकेतुः** – वत्स कथं मां दृष्ट्वापि परित्यज्य गतोऽसि?

**देवी** – हा पुत्र कथं वाङ्मात्रेणापि त्वया न संभावितास्मि?

**मलयवती** – हा आर्यपुत्र! कथं गुरुजनोऽपि त्वयोपेक्षितः?

**(सर्वे मोहं गच्छन्ति)**

**जीमूतवाहनः**– (समाश्वस्य) शङ्खचूड! समाश्वासय गुरुन्।

**शङ्खचूडः** – तात! समाश्वसिहि। मातः! समाश्वसिहि।

**जीमूतवाहनः**– मरणावस्थां नाटयति।

**जीमूतकेतुः** – (ससम्भ्रमम्) हा वत्स! किमेवं करोषि?

**देवी** – हा! किं नु खल्वेवं वदति? परित्रायध्वं परित्रायध्वम्। एष खलु मे पुत्रको विपद्यते।

**गरुडः** – (सोद्वेगम्) कष्टमुपरतोऽयं महात्मा। तत किमिदानीं करोमि।

**देवी** – (सास्रमूर्ध्वमवलोक्य) भगवन्तो लोकपाला कथं नामृतेन सिक्त्वा पुत्रकं मे जीवयत।

**गरुडः** – (सहर्षमात्मगतम्) अये, अमृतसंकीर्तनात्साधु स्मृतम्। मन्ये प्रमृष्टमयशः। तद्यावत् त्रिदशपतिमभ्यर्थ्य तद्विसृष्टेनामृतवर्षेण न केवलं जीमूतवाहनमेतानपि पूर्वभक्षितानस्थिशेषानुरगपतीन् प्रत्युज्जीवयामि तदयं गतोऽस्मि।

**(इति साटोपं परिक्रम्य निष्क्रान्तः)**

**(ततः प्रविशति ससम्भ्रमा गौरी)**

**जीमूतकेतुः** – अये कथममोघदर्शना भगवती गौरी।
गौरी नायकमुपसृत्य कमण्डलूदकेनाभिषिच्य वत्स! जीव जीमूतवाहन ते परितुष्टास्मि।

**(जीमूतवाहनः उत्तिष्ठति)**

**जीमूतकेतुः** – (सहर्षम्) देवि दिष्ट्या वर्धसे। प्रत्युज्जीवितो मे वत्सः।

**देवी** – भगवत्या गौर्याः प्रसादेन।

**(इति गौर्याः पादयोः पतन्ति। सर्वे ऊर्ध्वं पश्यन्ति)**

**जीमूतकेतुः** – अये कथमनभ्रा वृष्टिः। भगवति! किमेतत्।

**गौरी** – राजन्! जीमूतवाहनं प्रत्युज्जीवयितुमेतांश्चास्थिशेषान् उरगपतीन् समुपजातपश्चात्तापेन पक्षिपतिना गरुडेन देवलोकादियममृतवृष्टिः पातिता।

# अभ्यास प्रश्न

1. निम्नलिखित प्रश्नों के उत्तर संस्कृत में लिखिए–
   (क) जीमूतवाहनस्य वार्तामन्वेष्टुं महाराज विश्वावसुना प्रतीहारः कुत्र प्रेषितः?
   (ख) जीमूतवाहनस्य पितुः किम् नाम?

अथवा जीमूतवाहनस्य पिता क: आसीत्? **(2020MU)**

(ग) शङ्खचूड: क: आसीत्? **(2019AP, AR, AT)**

(घ) जीमूतवाहन: फणिन: प्राणान् परिरक्षितुम् किम् अकरोत्?

(ङ) गरुडेन क: व्यापादित:? **(2020MQ)**

अथवा जीमूतवाहन: केन व्यापादित:?

(च) जीमूतवाहन: कथं प्रत्युज्जीवित: कृत:?

(छ) अनभ्रा वृष्टि: कथं अभवत्?

(ज) जीमूतवाहन: कस्य पुत्र: आसीत्?

(झ) जीमूतवाहन: कस्य वंशस्य तिलक आसीत्?

(ञ) रक्तवस्त्र संवीत: क: प्रविशति?

(ट) नागानन्द नाटकस्य रचयिता क: आसीत्? **(2019AQ, 20MT)**

2. 'कारुणिको जीमूतवाहन:' पाठ का सारांश लिखिए।

3. 'कारुणिको जीमूतवाहन:' पाठ के आधार पर जीमूतवाहन के चरित्र की विशेषताएँ लिखिए। **(2018HQ,20MR,MS,MU)**

4. गरुड़ का चरित्र-चित्रण कीजिए।

अथवा 'कारुणिको जीमूतवाहन:' के आधार पर गरुड़ का चरित्र-चित्रण कीजिए।

5. 'कारुणिको जीमूतवाहन:' पाठ के आधार पर शंखचूड़ का चरित्र-चित्रण कीजिए। **(2018HP,HR,19AS,AT,AU,20MO)**

## वस्तुनिष्ठ प्रश्न

**निम्न चार विकल्पों में से सही विकल्प का चयन कीजिए—**

1. **जीमूतवाहनः पुत्रः आसीत् –**
   (क) श्वेतकेतो (ख) जीमूतकेतो (ग) शंखचूडस्य (घ) गरुड़स्य
2. **शंखचूडः .................................... आसीत्।**
   (क) नाग: (ख) देव: (ग) दनुज: (घ) मानव:
3. **नागानन्दस्य नाटकस्य रचयिता ............. अस्ति।** **(2019AT)**
   (क) कालिदास: (ख) हर्षवर्धन: (ग) भवभूति: (घ) विशाखदत्त:
4. **गरुडेन व्यापादित:—** **(2018HR)**
   (क) जीमूतवाहन: (ख) शंखचूड: (ग) जीमूतकेतु: (घ) सर्वा:
5. **जीमूतवाहनस्य पिता ......................... आसीत्।**
   (क) शंखचूड: (ख) मलयकेतु: (ग) जीमूतकेतु: (घ) सत्यकेतु:
6. **विद्याधरः .................................. रक्षां करोति।**
   (क) गरुडस्य (ख) शंखचूडस्य (ग) वासुके: (घ) जीमूतकेतो:
7. **विद्याधरेण केनापि ........................ आविष्ट चेतसा।**
   (क) क्रोध (ख) पीड़ा (ग) करुणा (घ) भय

## ➡ आन्तरिक मूल्यांकन

जीमूतवाहन की भाँति त्याग, बलिदान आदि गुणों वाले किसी परिचित की जीवनी लिखिए। ●